# Raja Kanthadharakritam Shri Krishnanarayana Stotram

# રાજા કન્થાધરકૃતં શ્રીકૃષ્ણનારાયણસ્તોત્રમ્

## Document Information

Text title : Raja Kanthadharakritam Shri Krishnanarayana Stotram

File name : rAjAkanthAdharakRRitaMshrIkRRiShNanArAyaNastotram.itx

Category : vishhnu, vishnu, lakShmInArAyaNIyasaMhitA, stotra, krishna

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 2 | adhyAya 42/53-102||

Latest update : February 5, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 5, 2026

*sanskritdocuments.org*

# રાજા કન્થાધરકૃતં શ્રીકૃષ્ણનારાયણસ્તોત્રમ્

મ્લેચ્છતા લયમાપન્ના દિવ્યપ્રભા પ્રવર્ધિતા ।
કન્થાધરો વિમાનસ્થો સસ્ત્રીકો દેવતાઽભવત્ ॥ ૮૮॥

અનાદિશ્રીકૃષ્ણનારાયણં શ્રીપુરુષોત્તમમ્ ।
તુષ્ટાવ પરયા પ્રીત્યા વિમાનસ્થોઽતિહર્ષિતઃ ॥ ૮૯॥

પરબ્રહ્મ પરોદ્ધારકૃપાનુગ્રહવિગ્રહ ।
તવ શિષ્યેણ ઋષિણા તારિતૌ પાપિનૌ પ્રભો ॥ ૯૦॥

પુત્રેણ તારિતૌ ચાપિ ત્વયાઽપિ તારિતૌ હરે ।
તોયૈશ્ચ તારિતૌ દુષ્ટૌ પરોપકૃતિશાલિભિઃ ॥ ૯૧॥

વિપ્રૈશ્ચ તારિતૌ ઘોરાત્તમસોઽજ્ઞાનવૈભવાત્ ।
નારકી તારિતૌ કૃષ્ણનારાયણ તવાશ્રયાત્ ॥ ૯૨॥

પરેશ્વરાય હૃત્સ્થાય વિપ્રસ્થાય ચ તે નમઃ ।
સ્વયમ્પ્રકાશરૂપાય તીર્થાત્મકાય તે નમઃ ॥ ૯૩॥

નમઃ શરણ્યદેવાય પાપિપ્રાણહિતાય ચ ।
શ્રિતમોક્ષાય બાલાય બાલકૃષ્ણાય તે નમઃ ॥ ૯૪॥

ત્વત્પ્રતાપાત્તરન્ત્યેવ યક્ષરાક્ષસપન્નગાઃ ।
દૈત્યાશ્ચ દાનવા દુષ્ટા આસુરાસ્તામસાસ્તથા ॥ ૯૫॥

માયિકા વાસનાયુક્તા ગર્વિષ્ઠાશ્ચાભિમાનિનઃ ।
વ્યવાયિનઃ પિશિતાદાઃ સ્તેના આસવપાયિનઃ ॥ ૯૬॥

વર્ણસઙ્કરકારાશ્ચ ગોસ્ત્રીહત્યાકરાસ્તથા ।
ત્વત્પ્રતાપાત્તરન્ત્યેવ કૃપાનુગ્રહશેવધેઃ ॥ ૯૭॥

આવાં ચ તારિતૌ યામસ્તવ ધામાઽમૃતં પ્રભો ।
ઇત્યુક્ત્વા પ્રણિપત્યૈતૌ પુત્ર સ્વસ્તિ તવાઽસ્તુ ચ ॥ ૯૮॥

દત્વાऽऽશિષો યયતુશ્ચ લોમશસ્યાऽऽશ્રમં પ્રતિ ।
"ૐ નમઃ શ્રીકૃષ્ણનારાયણાય પતયે સ્વાહા" ॥ ૯૯॥

ઇતિમન્ત્રં લોમશાચ્ચ ગૃહીત્વા તુલસીસ્રજમ્ ।
પરમૌ વૈષ્ણવૌ ભૂત્વા યયતુર્વૈષ્ણવં પદમ્ ॥ ૧૦૦॥

આશ્ચર્યં પરમં પ્રાપ્તાસ્તૈર્થિકાશ્ચ કુટુમ્બિનઃ ।
યદત્ર સ્નાનમાત્રેણ મુક્તિર્જાતા હિ શાશ્વતી ॥ ૧૦૧॥

અનાદિશ્રીકૃષ્ણનારાયણસ્યેયં દયા પરા ।
રાધિકે પ્રબલેચ્છા ચ કરુણા પ્રબલા હરેઃ ॥ ૧૦૨॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૨। અધ્યાય ૪૨-અધ્યાયાન્તર્ગતં
રાજા કન્થાધરકૃતં શ્રીકૃષ્ણનારાયણસ્તોત્રં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૨। અધ્યાય ૪૨/૫૩-૧૦૨॥

lakShmInArAyaNIyasaMhitA . khaNDa 2. adhyAya 42/53-102..

Proofread by PSA Easwaran

*Raja Kanthadharakritam Shri Krishnanarayana Stotram*

pdf was typeset on February 5, 2026

Please send corrections to *sanskrit@cheerful.com*